This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

श्री

श्रीगणेशाय नमः ॥ नानाशास्त्रोद्धृतं वक्ष्ये राजनीतिसमुच्चयं ॥ सर्वबीजमयं शास्त्रं चाणाक्यं सारसंग्र
हं ॥१॥ मूलसूत्रं प्रवक्ष्यामि चाणाक्येन यथोदितं ॥ येन विज्ञानमात्रेण मूर्खो भवति पंडितः ॥२॥ धनिनः श्रो
त्रियो राजा नदी वैद्यस्तु पंचमः ॥ पंच यत्र न विद्यंते तत्र वासं न कारयेत् ॥३॥ दुष्टा भार्या शठं मित्रं भृत्यश्चोत्तरदा
यकाः ॥ ससर्पे च गृहे वासो मृत्युरेव न संशयः ॥४॥ त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत् ॥ ग्रामं जन
पदस्यार्थे आत्मार्थे पृथिवीं त्यजेत् ॥५॥ नरेंद्रं नावमन्येत ब्राह्मणं न प्रकोपयेत् ॥ वैरं न च [illegible] न च
[illegible]गर्भः ॥६॥ [illegible] जीर्णं च परस्य पुरुषस्य स्त्रियः ॥ दुर्जनं च शठं मंत्रं दूरतः परिवर्जयेत् ॥७॥ व
[illegible] हीन चमोत [illegible] ॥ [illegible] नाचया [illegible] त्यजेद्देवनसंशयः ॥८॥ परदार
[illegible] परस्य [illegible] ॥ [illegible] नचापल्यं चरित्र [illegible] ॥९॥ दुर्जनः परिहर्तव्यो
विद्ययालंकृतोपि सन् ॥ मणिना भूषितः सर्पः किमसौ न भयंकरः ॥१०॥ मूर्खस्तु परिहर्तव्यः प्र
त्यक्षो द्विपदः पशुः ॥ भिद्यते वाक्यशल्येन अदृष्टः कंटको यथा ॥११॥ कुदेशं च कुवृ
त्तिं च कुभार्यां कुनदीं तथा ॥ कुद्रव्यं च कुभोज्यं च दूरतः परिवर्जयेत् ॥१२॥ गुरुपत्नी राज
पत्नी परपत्नी तथैव च ॥ [illegible] ॥१३॥ [illegible]

Acc. No. ~~1850~~ M-1542
Title - वृद्धचाणक्य.
Author - चाणक्य.
Date - शके 1756
Sub - poetry.
Folio - 7
Xerox - 14.

K K S U LIBRARY
RAMTEK
441 106
M-1542
Dist. Nagpur

Checked 2012

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्री 1850

श्रीगणेशाय नमः ॥ नानाशास्त्रोद्धृतं वक्ष्ये राजनीतिसमुच्चयं ॥ सर्वबीजमयं शास्त्रं चाणाक्यं सारसंग
हं ॥१॥ मूलसूत्रं प्रवक्ष्यामि चाणाक्येन यथोदितं ॥ यस्य विज्ञानमात्रेण मूर्खो भवति पंडितः ॥२॥ धनिनः श्रो
त्रियो राजा नदी वैद्यस्तु पंचमः ॥ पंच यत्र न विद्यंते तत्र वासं न कारयेत् ॥ दुष्टा भार्या शठं मित्रं भृत्यश्चोत्तरदा
यकाः ॥ ससर्पे च गृहे वासो मृत्युरेव न संशयः ॥४॥ त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत् ॥ ग्रामं जन
पदस्यार्थे आत्मार्थे पृथिवीं त्यजेत् ॥५॥ नरेंद्रं नावमन्येत ब्राह्मणं न प्रकोपयेत् ॥ दुष्टैरेणं न च क्रीडेन् न च
द्धं जनमे ॥६॥ जीर्णं वस्त्रं जीर्णं च परपुरुषगाः स्त्रियः ॥ दुर्जनं च शठं मित्रं दूरतः परिवर्जयेत् ॥७॥ व
स्त्रहीनमलंकारं [illegible] हीनं च भोजनं ॥ स्नानहीना च या नारी त्यजेदेव न संशयः ॥८॥ परद्रव्यप
रस्वं च परवादं परस्त्रियं ॥ परिहासं गुरोः स्थाने चापल्यं च विवर्जयेत् ॥९॥ दुर्जनः परिहर्तव्यो
विद्ययालंकृतोपि सन् ॥ मणिना भूषितः सर्पः किमसौ न भयंकरः ॥१०॥ मूर्खस्तु परिहर्तव्यः प्र
त्यक्षो द्विपदः पशुः ॥ भिद्यते वाक्यशल्येन अदृश्यः कंटको यथा ॥११॥ कुदेशं च कुवृ
त्तिं च कुभार्यां कुनदीं तथा ॥ कुद्रव्यं च कुभोज्यं च दूरतः परिवर्जयेत् ॥१२॥ राजपत्नी गुरोः
पत्नी परपत्नी तथैव च ॥ [illegible] ॥१३॥ [illegible]

Acc. No. ~~1850~~ M-1542
Title - वृद्धचाणक्य.
Author - चाणक्य.
Date - शके 1756
Sub - poetry.
folio - 7
Xerox - 14.

KKSU LIBRARY RAMTEK 441 106 M-1542 Dist. Nagpur

Checked 2012

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चा० रत्न०

पत्र

॥१॥

मत्पुत्रं कृपणं त्यजेत् ॥ कृपणं च त्यजेत् दूरं स्वाल्पकुलनाशनं ॥१५॥ शोकेन नश्यते धर्मः सुखं शोकेन नश्यते ॥ शोकेन नश्यते
बुद्धिर्नास्ति शोकसमो रिपुः ॥१६॥ धर्मकामार्थमोक्षेषु शोकः शत्रुरिहोच्यते ॥ तस्माच्छोकं न कर्तव्यं [illegible] हितं ॥१७॥ परोक्षे का
र्यहन्तारं प्रत्यक्षे प्रियवादिनं ॥ वर्जयेत्तादृशं मित्रं विषकुंभं पयोमुखं ॥१८॥ पयःपानं भुजंगानां केवलं विषवर्धनं ॥ उपदेशो हि मूर्खाणां प्र
कोपाय न शान्तये ॥१९॥ नदीनां च नखीनां च शृंगीणां शस्त्रपाणिनां ॥ विश्वासो नैव कर्तव्यः स्त्रीषु राजकुलेषु च ॥२०॥ यदि च्छेत्सततं प्री
तिं त्रीणि तत्र न कारयेत् ॥ अर्थसंबंधप्रयोगं च परोक्षे दारदर्शनं ॥२१॥ शुष्कमांसं स्त्रियो वृद्धा बालार्कस्तरुणं दधि ॥ प्रभाते मैथुनं निद्रा सद्यः प्रा
णहराणि षट् ॥२२॥ स्त्री पीयूषादिकं प्राप्य तत्क्षणे कस्यापि नो भवेत् ॥ मुग्धनेत्रहिपजातं सर्वं सत्यं तन्न दृश्यते ॥२३॥ अतिदानाद्बलिर्बद्धो अ
तिमानात्सुयोधनः ॥ अतिरूपवती सीता सर्वमत्यन्तगर्हितं ॥२४॥ चिंता ज्वरो मनुष्याणां वस्त्राणामातपो ज्वरः ॥ असौभाग्यं ज्वरः
स्त्रीणां अश्वानां मैथुनं ज्वरः ॥२५॥ हस्ती हस्तसहस्रेण शतहस्तेन वाजिनः ॥ शाकटं पंचहस्तेन देशत्यागेन दुर्जनः ॥२६॥ परवस्त्रेण
शोभा परदारेषु या रतिः ॥ भोजनं च पराधीनं तिस्रः पुंसां विडंबनाः ॥२७॥ कुमित्रेण हतो राजा कुवादेन हताः प्रजाः ॥ कुभार्या
च हतं सस्यं कुपुत्रः कुलनाशकः ॥२८॥ कुभोजनं दिनं नष्टं कुस्त्रिया च नष्टा शर्वरी ॥ कुपुत्रेण कुलं नष्टं [illegible] दीयते ॥२९॥ वृद्धार्क
यज्ञधूमं च तरुणी [illegible] दकं ॥ आयुष्यं न धर्यन्ति सरात्रौ च पयभोजनं ॥३०॥ दुर्जनः प्रियवादी च नैव विश्वासकारकः ॥ मधुस्र
वति जिह्वाग्रे हृदि हालाहलं विषं ॥३१॥ अर्थनाशं मनस्तापं गृहे दुश्चरितानि च ॥ वचनं चापमानं च मतिमान्न प्रकाशयेत् ॥ र
घनकुंभसमा नारी तप्तांगारसमः पुमान् ॥ तस्मात् घृतं [illegible] च नैकत्र स्थापयेद्बुधः ॥३२॥ जीर्णमन्नं प्रशंसीयात् ॥

३

2

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भार्यां विगतयौवनां ॥ रणात्प्रत्यागतं नष्टरसं स्वं च गृहमागतं ॥ ३४ ॥ नाहारं चिंतयेत्प्राज्ञो धर्ममेव हि चिंतयेत् ॥ आहारोऽपि मनुष्याणां
जन्मना सह जायते ॥ ३५ ॥ चलत्येकेन पादेन तिष्ठत्येकेन बुद्धिमान् ॥ मास मी स्यं पुत्र स्थान दर्व मायत नस्य जेत् ॥ ३६ ॥ स्वहस्त
लिखितं स्तोत्रं स्वयं घृष्टं च चंदनं ॥ स्वयं विरचिता माला शक्रस्यापि श्रियं हरेत् ॥ ३७ ॥ नात्यंतं मृदुना भाव्यं नात्यंतं क्रूरचेतसा ॥ सर्वत्र तो३
बाध्यते ॥ निःसारस्य पदार्थस्य प्रायेणाडंबरो महान् ॥ ३८ ॥ नास्ति मे वीनरद्राणां नास्ति मे जीव लेः सह ॥ नास्ति के सह धामे मैत्री
विनाशे येण लिप्यति ॥ ३९ ॥ सं प्राप्यायां गज्जितैर्मेघैः शास्त्रं चिंताकरो नियः ॥ चलाचित्तस्य न रंपति आयु विचाय रोबलं ४०
स्तुभिक्षं कर्षुके नित्यं सुखं निःस्पृह रोगिणा ॥ भार्यामृत वरास्य तस्या नित्योत्सवो गृहे ॥ ४१ ॥ नदी तीरे च ये वृक्षाः परगेहेषु कामिनी ॥ म
४२० त्रिणा रहितो राजा च क्षिप्रं तस्य जीवितं दुर्धीता विद्या विद्या अजीर्णे भोजनं विषं ॥ ४२ ॥ विषं गोष्ठी दरिद्रस्य वृद्धस्य तरुणी विषं ॥ ४३ ॥
अति क्रोधन मनस्य आणानिक्षोभेन यस्तु खं ॥ अन्ययीडाकुरोध मैनि च कार्यस्य साधुभिः ॥ ४४ ॥ न च्छालत्यन गंगनं व्यस्य रामप्यसमा सह ॥
न यो पिरोक्षिको हस्तेनापी त्वापि धीयते ॥ ४५ ॥ दिव्यं चूतरसं पीत्वा न गर्वं याति कोकिलः ॥ पीत्वा कर्दमपानीयं भेको याति प्रवितृतां ॥ ४६ ॥
नदीनारे वयं च सोपर तस्य तपते धीगतं वापियत्काेयं तस्य वै निष्फलं भवेत् ॥ ४७ ॥ न मांति फलितो वृक्षा न मंति गुणिनो जनाः ॥
शुष्क काष्ठं च मूर्खं च भिद्यते न तु नम्यते ॥ ४८ ॥ येन धर्मो न कर्तव्यः परलोकस्येति दृतिः ॥ नार्लं तु नेवराक्रोनिमं ऽपदं क्षयेन्नरः ॥ ४९ ॥
अविद्यः पुरुषः शोच्यः शोच्या राज्य मरागनं ॥ निराहाराः प्रजाः शोच्याः शोच्यं मैथुनम प्रजं ॥ ५० ॥ दरिद्रेणाभिभूतस्य पंचेन भ्रष्टतिरहितनः ॥
अन्नात्रं चनं पश्यादत्य धर्मस्तु पंचमः ॥ ५१ ॥ सफलः सेव्यते वृक्षो वारनैः पुष्पिभिन रैः ॥ वहलुकादि पर्यं तियद पर्स्व निष्फलं
त्रिमोस्त्यवला तिपाह नो भूमरे वावलं नीतीं ॥ त्वयि ज्ञाताभराधानां त्वमेव शरणं मम ॥ ५३ ॥ अदीनो जा तवीवे न प्रमदानां पतिव्रता ॥ १२
धान्यं प्रयच्छ नानानां हि देशानां यत्र निर्वृतिः ॥ ५४ ॥ विपत्तेस्त्री पुत्रपत्न्यो विपत्तो ब्राह्मणे तपः ॥ पालयेन् नीतिर्नी चेद्यासौ प्रुवं तैते ॥ ५५ ॥

3

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अवशं प्रप्रवीणानां मूर्खपुत्रस्तु पंडितः ॥ अधनस्य धनं प्राप्य तृणवन्मन्यते जगत् ॥५६॥ लोकव्यवहारमिमे वार्त्ता शरीरे कुशलं तव । कुतः कुशलमस्माकं
मायुर्याति दिने दिने ॥५७॥ पुंश्चली राज्ञस्य शास्त्रस्य हेतुर्विचेमनिपतये ॥ आधा हास्यास्पदं भवेदिति यादि यमसदा ॥५८॥ यस्य नास्ति स्व
यं प्रज्ञा शास्त्रं तस्य करोति किं । लोचनाभ्यां विहीनस्य दर्पणः किं करिष्यति ॥५९॥ रूपयौवनसंपन्ना विशालकुलसंभवाः ॥ विद्याही
ना न शोभंते निर्गंधा इव किंशुकाः ॥६०॥ विद्यार्थिनस्तृणं नारी तृणं शूरस्य जीवितं ॥ तृणं ब्रह्मविदः स्वर्गं निस्पृहस्य तृणं जगत् ॥६१॥
यो यत्र सततं याति स्नेहं चाप्य निरंतरं ॥ तत्रैव पुत्रा यानि यस्त्रिया कुसमो भवेत् ॥६२॥ माता च द्विविधं दृष्टा कोपो तिपिता सुतं ॥
तं श्राहरतिसर्वस्वं तन्नकोपरिवेदना ॥६३॥ स्त्रियो वेका समं मूलाख्यातं व्याघ्रमूलानरास्तथा ॥ नीतिमूलाश्च राजानो धर्ममूलो भवेद्विजः ॥६४॥
दुर्लभं मुखं पद्मदलाकारं वाणी चंदनशीतला ॥ हृदयं कर्तलितायुक्तं मेलधूर्तस्य लक्षणं ॥६५॥ धनानृणां जीविनाशाः वायुर्वी प्राणोष्ट वायस्य
स्यहृश्यतं तणिभार्या प्राणे श्वो विपरी यस्त्री ॥ न स्त्रीणामप्रियः कश्चित् प्रियो वापि न विद्यते ॥ गावस्तृणमिवारण्ये प्रार्थयंति नवं नवं ॥६६॥
व्यरिमित्रमुदासीनं मध्यस्थं स्थविरं गुरुं ॥ यो न बुध्यति मंदात्मा स कर्पयति सर्वदा ॥६७॥ नरस्याभरणं रूपं रूपस्याभरणं गुणः ॥
गुणस्याभरणं ज्ञानं ज्ञानस्याभरणं क्षमा ॥६८॥ अस्नाता पिनर्पुत्रो यस्यास्ति विपुलं धनं ॥ राशि न स्तुत्य वंशोपि निर्गुणः परिक्षयते ॥७०॥
हतं ज्ञानं क्रियाहीनं हतं नाज्ञानं क्रियाः ॥ हतं रूपं विषं च दारिद्र्ये नाहतं कुलं ॥७१॥ मोकर्यं लाघवायैव मानं सुचक्रं निकारणं ॥
सुरवक्त्रपुरः पादे हर्दहात्स विराजते ॥७२॥ अलसो मंदबुद्धिश्च दुःखितो व्याधिपीडितः ॥ निद्रालुः कामुकश्चैव ष
डेते शास्त्रवर्जिताः ॥७३॥ आचारः कुलमाख्याति देशमाख्याति भाषणं ॥ संभ्रमः स्नेहमाख्याति
वपुराख्याति भोजनं ॥७४॥ महतामापदे नित्यं महतामेव संपदः ॥ क्षीयते वर्धते चंद्रो न च तारागणः ॥ ॥७५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंकरोतु नरः प्राज्ञः प्रेर्यमाणः स्वकर्मभिः ॥ प्रायेण हि मनुष्याणां बुद्धिः कर्मानुसारिणी ॥ ७६ ॥ धामकोमधुवासश्च खरडकूपसस्य चंद्रमाः ॥
भिक्षा च राज्ञकोशश्च स्तोकस्तोकेन वर्धते ॥ ७७ ॥ हीनसेवा न कर्तव्या कर्तव्यो महदाश्रयः ॥ अजा सिंह प्रसादेन वने चरति
निर्भयं ॥ ७८ ॥ नैव पश्यति जात्यांधः कामांधो नैव पश्यति ॥ न पश्यति मदांधोपि अर्थी दोषं न पश्यति ॥ ७९ ॥ पूर्वजन्मकृता विद्या पूर्वजन्म
नि यद्धनं ॥ पूर्वजन्मनि या भार्या अग्रे धावति धावति ॥ ८० ॥ करोतु नाम नीतिज्ञो व्यवसायमितस्ततः ॥ फलं पुनस्तदेवस्याद्यद्विधे
र्मनसि स्थितं ॥ ८१ ॥ कुपात्रे रमते नारी गिरौ वर्षति वारिदः ॥ नीचमाश्रयते लक्ष्मीः प्राज्ञः प्रायेण निर्धनः ॥ ८२ ॥ दानभोगविही
नेन धनेन धनिनो यदि ॥ [illegible] खातनिखातेन धनेन धनिनो वयं ॥ ८३ ॥ आपदर्थे धनं रक्षेच्छ्रीमतां कुतआपदः ॥ कदाचित्कुप्य
ते लक्ष्मीः संचितापि विनश्यति ॥ ८४ ॥ भवंति यस्य भार्या [illegible] भवंति महता मयि ॥ न गतं च नीलकंठस्य महाहितिराय नंदने ॥ ८५ ॥
विधात्रा लिखिता या तु ललाटे अक्षरमालिका ॥ देवो न वराङ्कोति तल्लिखितं लिखितुं पुनः ॥ ८६ ॥ [illegible] योपि दोषता याति वक्रस्थले
विधातरि ॥ सानुकूले पुनस्तस्मिन्दोषोपि च गुणायते ॥ ८७ ॥ समुद्रा भरणाद्भूमिः आकोसभरणात्पुरी ॥ नरेंद्राभरणा
देशाश्च स्त्रीभरणाः स्त्रियः ॥ ८८ ॥ आलसाद्धि गुणः क्षीणा बुद्धिः [illegible] कामश्च [illegible] गुणः स्मृ
तः ॥ ८९ ॥ सुन्दरं पुरुषं दृष्ट्वा भ्रातरं पितरं सुतं ॥ योनिः स्रवति नारीणां सत्यं सत्यं हि नारद ॥ ९० ॥ स्थानं नास्ति क्षणं नास्ति
नास्ति प्रार्थयिता नरः ॥ तेन नारद नारीणां सतीत्वमुपजायते ॥ ९१ ॥ वेश्या स्त्रीणां कुतः स्नेहः कुतः सत्यं च कामिनां ॥ न स्व
र्णस्य कुतो धर्मः दुर्जनस्य कुतः क्षमा ॥ ९२ ॥ खलः करोति दुर्वृत्तं नूनं फलति साधुषु ॥ दशाननो हरेत्सीतां बंधनं स्यान्महोदधेः ॥ ९३ ॥
[illegible] खल [illegible] ति भवत्यस्य चर्यापितः ॥ किं चित्रं कालोपमा यांति ये यो वयो नि[illegible] नाणि च ॥ ९४ ॥ सर्पः क्रूरः खलः
क्रूरः सर्पात्क्रूरतरः खलः ॥ मंत्रौषधिवशः सर्पः खलः केनापि राम्यति ॥ ९५ ॥ न देवाय न धर्माय न बंधुभ्यो न चार्थिने ॥
॥ कृपणस्य धनं याति वह्नि तस्कर पार्थिवैः ॥ ९६ ॥ १२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वा० रत्ना०

॥२॥ दरिद्रान्भर कौन्तेय मा प्रयच्छेश्वरे धनं ॥ व्याधितस्यौषधं पथ्यं निरुजस्य किमौषधं ॥९७॥ विद्वानेव विजानाति विद्वज्ज-
नपरिश्रमं ॥ न हि वन्ध्या विजानाति गुर्वी प्रसववेदनां ॥९८॥ दूरतः शोभते मूर्खो लंबशाटपटावृतः ॥ तावच्च शोभते मू-
र्खो यावत्किंचिन्न भाषते ॥९९॥ भाग्यं फलति सर्वत्र न विद्या न च पौरुषं ॥ विद्या रूपं कुरूपाणां क्षमा रूपं तपस्विनां ॥१००॥
अमृतं शिशिरे वह्निरमृतं -- तं ॥ अमृतं -- वक्षा अमृतं पुंडिलः सुतः ॥१०१॥ प्रदीपानामयं वातः पद्मानां शिशि-
रं भयं ॥ पर्वतानां भयं वज्रं साधूनां दुर्जनो भयं ॥२॥ साधुः सन्मानमानेन भजते नैव विक्रियां ॥ उपकारं ह्यात्मनापि किं न लैबाधते खलः ॥३॥
यौवनं धनसंपत्तिः प्रभुत्वमविवेकिता ॥ एकैकमप्यनर्थाय किमु यत्र चतुष्टयं ॥४॥ पितरं -- मातुर्द्यान्न हनस्य ॥ गोषु
ब्राह्मसमं च द्यात्तस्य मे कृषि व्रजेत् ॥५॥ मातरं पितरं --- साध्वी भार्यां स्तनांशिशुं ॥ गुरुं च मंत्रं सुतं कन्यां मरिष्याव्यमतः त्वयं ॥६॥
स बंधु ------- सा भार्या या पतिव्रता ॥ तन्मित्रं यत्र संज्ञाभो स देशो यत्र जीवति ॥७॥ कीर्षियेन न कुर्वीत गावो यस्य न धेनवः ॥
स्यात्तं तस्य दुर्भिक्षांति त्यंतस्य कुभोजनं ॥८॥ यस्यार्थस्तस्य मित्राणि यस्यार्थस्तस्य बांधवाः ॥ यस्यार्थः स पुमांल्लोके यस्यार्थः स
च पंडितः ॥९॥ अन्नाद्दशगुणं पिष्टं पिष्टाद्दशगुणं पयः ॥ पयसोऽष्टगुणं मांसं मांसादष्टगुणं हविः ॥१०॥ हविषोऽष्टगुणं मर्द-
नाचान्नस्य तु भक्षणात् ॥ धनधान्यप्रयोगेषु यथा विद्यागमेषु च ॥११॥ आहारे व्यवहारे च त्यक्तलज्जः सुखी भवेत् ॥ मानो यत्र
श्रियस्तत्र यत्रापमानस्तत्र सुरंकः ॥१२॥ यत्र साधुस्ततो जीवाये तोषतो नलसुखं ॥ आयुर्वित्तं गृहच्छिद्रं मैत्रं मैथुनभेषजे ॥१३॥
दानमानापमानं च नव गोप्यानि कारयेत् ॥१३॥ यत्नोत्सवो हि विप्राणां मूर्खाणां कलहो सयः ॥ सत्पुरुषोत्सवः स्त्रीणां
न्यायो नवत्सेतोत्सवः ॥१४॥ सेवितव्यो महावृक्षः फलच्छायासमन्वितः ॥ यदि दैवात्फलं नास्ति छाया केन निवार्यते ॥१५॥ १५॥

6

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दृष्टिपूतं न्यसेत्पादं वस्त्रपूतं जलं पिबेत् ॥ शास्त्रपूतं वदेद्वाक्यं मनःपूतं समाचरेत् ॥१६॥ उत्तमैः सहसंगेन नीचो यात्युत्तमो
गतिं ॥ तृणानि मूर्ध्ना धार्यंते ग्रथितैः कुसुमैः सह ॥१७॥ देवतां तोषयेद्भक्त्या गंधाद्यैः पूजयेन्नरः ॥ सुहृदश्चोपका
रेण नीचं चैव पराक्रमैः ॥१८॥ शोभते सलिले पद्मं शोभते सलिले द्विजः ॥ उपस्थिते उपाध्येन सर्वं शास्त्रेण शोभते ॥१९॥
जलबिंदुनिपातेन क्रमशः पूर्यते घटः ॥ स हेतुः सर्व विद्यानां धर्मस्य च धनस्य च ॥२०॥ व्यर्थं श्रुतम शीलस्य बलं
कापुरुषस्य च ॥ दुस्थान मन्त्र भोगस्य व्यर्थं कृपणजीविनं ॥२१॥ पंडिते च गुणाः सर्वे मूर्खे दोषास्तु केवलं ।
तस्मान्मूर्खसहस्रेण प्राज्ञ एको विशिष्यते ॥२२॥ अग्निर्दहति तापेन सूर्यो दहति रश्मिभिः ॥ राजा दहति
दंडेन ब्राह्मणो मन्युना दहेत् ॥२३॥ तिलकं विप्रहस्तेन मातृहस्तेन भोजनं ॥ दानमात्मीयहस्तेन परहस्तेन मर्दनं ॥२४
अग्निहोत्रफला वेदाः शीलवृत्तिफलं श्रुतं ॥ रतिपुत्रफला दारा दानभोगफलं धनं ॥२५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चा० ४॥ आपदर्थेधनंरक्षेद्दारांरक्षेद्धनैरपि॥आत्मानंसततंरक्षेद्दारैरपिधनैरपि॥२६॥ नचविद्यासमोबंधुः
नचव्याधिसमोरिपुः॥नचापत्यसमःस्नेहोनचदैवात्परंबलं॥२७॥कोतिभारःसमर्थानांकिं
दूरंव्यवसायिनां॥कोविदेशःसविद्यानांकःपरःप्रियवादिनां॥२८॥ यत्रतत्रप्रसूतोहिगुणवा
न्पूज्यतेनरः॥धनुर्वंशविशुद्धोपिनिर्गुणःकिंकरिष्यति॥२९॥ यथाह्येकेनचक्रेणनरथस्यगति
र्भवेत्॥एवंपुरुषकारेणविनादैवंनसिध्यति॥३०॥पुस्तकस्थातुयाविद्यापरहस्तगतं
धनं॥कार्यकालेसमुत्पन्नेनसाविद्यानतद्धनं॥३१॥तैलाद्रक्षेज्जलाद्रक्षेद्रक्षेच्छिथिलबंध
नात्॥आरक्षेत्परहस्तेभ्यः एववदतिपुस्तकं॥३२॥ दुर्लभःप्राकृतःसाधुर्दुर्लभःसमीप्रदः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥५५५ः५२८॥

दुर्लभा सहस्रेषु दुर्लभं वचनं प्रियं ॥३३॥ धर्मार्थं दीयते दानं किंचित्कार्याय दीयते । किंचित्तूपकारार्थं श्री
ति स्त्रीहस्यकारणं ॥३४॥ दानं हि भूषणं लोके दानं दुर्गति मडनं । दान स्वर्गश्च मोक्षश्च दानं सार्थिकारं स्मृतं ३५॥
अजरामरवत्प्राज्ञो विद्यामर्थं च चिंतयेत् । गृहीत इव केशेषु मृत्युना धर्ममाचरेत् ॥३६॥ गुणि न्यासि
हसंगेन निर्गुणोपि गुणायते । पद्मपत्रेस्थितं वारि धत्ते मुक्ताफलश्रियं ॥३७॥ किं कुलेन विशालेन विद्या
हीनो हि यो नरः ॥ अकुलीनोपि शास्त्रज्ञो दैवतैव प्रपद्यते ॥३८॥ लालयेत्पंचवर्षाणि दशवर्षाणि ताड
येत् । संप्राप्ते षोडशे वर्षे पुत्रं मित्रवदाचरेत् ॥३९॥ लालनाद्बहवो दोषास्ताडनाद्बहवो गुणाः ॥
तस्माच्छिष्यं च पुत्रं च ताडयेन्न तु लालयेत् ॥४०॥ क्षेत्रे गोत्रे कलत्रे च तपोवृद्धे देवकर्मणि । पुत्रे
यशसि तोये च मराणां भाग्यलक्षणं ॥४१॥ प्रज्ञाव सहस्रं वा स्वयं सद्भावसहस्रप्रिये । आम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चा०
५॥

शान्तिसमं को पंथो ज्ञानातिसंपंडितः॥४२॥ अथ प्रथमेनार्जिता विद्या द्वितीयेनार्जितं धनं॥ तृतीयेना
र्जितं पुण्यं चतुर्थे किं करिष्यति॥४३॥ बालादपि ग्रहीतव्यं युक्तमुक्तं मनीषिभिः॥ रवेरविषये किं
न प्रदीपस्य प्रकाशनं॥४४॥ उपकारगृहीतेन शत्रुणा शत्रुमुद्धरेत्॥ पादलग्नं करस्थेन कंटके
नेव कंटकं॥४५॥ परोपि हितवान् बंधुर्बंधुरप्यहितः परः॥ अहितो देहजो व्याधिर्हितमारण्यमौष
धं॥४६॥ उत्सवे व्यसने चैव दुर्भिक्षे शत्रुविग्रहे॥ राजद्वारे स्मशाने च यस्तिष्ठति स बांधवः॥४७॥
अहि बिडालिया मा मोरडिका वसुपुत्रिका॥ आत्मभावो न गच्छति भागिनेयस्तु पंचमः॥४८॥
मातृवत्परदारेषु परद्रव्येषु लोष्ठवत्॥ आत्मवत्सर्वभूतेषु यः पश्यति स पंडितः॥४९॥
विद्या ददाति विनयं विनया याति पात्रतां॥ पात्रत्वाद्धनमाप्नोति [illegible] [illegible]
द्धर्मस्ततः सुखं॥५०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कुलीनैसह संबंधं पंडितैः सहसख्यता ॥ सज्जनैः सहसख्यता ॥ सहमित्रत्वं ॥ कुर्वीणो नावसीदति ॥ ५१ ॥ विषादप्यमृ
तं ग्राह्यं अमेध्यादपि कांचनं ॥ नीचादप्युत्तमां विद्यां स्त्रीरत्नं दुष्कुलादपि ॥ ५२ ॥ अपमानं पुरस्कृत्य मानं
कृत्वा तु पृष्ठतः ॥ स्वकार्यमुद्धरेत्प्राज्ञः कार्यध्वंसो हि मूर्खता ॥ ५३ ॥ मनसा चिंतितं कार्यं वचसा न प्रकाश
येत् ॥ अन्यलक्षितकार्यं हि क्रियासिद्धिर्न जायते ॥ ५४ ॥ दुर्बलस्य बलं राजा बालानां रोदनं बलं ॥
बलं मूर्खस्य मौनं च तस्करस्यानृतं बलं ॥ ५५ ॥ गुरुरग्निर्द्विजातीनां वर्णानां ब्राह्मणो गुरुः ॥ पतिरेको गुरुः स्त्रीणां
सर्वस्याभ्यागतो गुरुः ॥ ५६ ॥ अन्नदाता भयत्राता यश्च कन्यां प्रयच्छति ॥ जनिता चोपनीता च पंचैते पितरः स्मृताः ॥ ५७ ॥
माता यस्य गृहे नास्ति भार्या चाप्रियवादिनी ॥ अरण्यं तेन गंतव्यं यथारण्यं तथा गृहं ॥ ५८ ॥ यस्य भार्या गृहे
नित्यं ब्राह्मणोऽत्र परिगर्जति ॥ सीदंति यस्य गात्राणि पद्मिनीव हिमागमे ॥ ५९ ॥ कूपो … तरुच्छा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चा०

॥ ८९ ॥ यारूपामास्त्री मुग्धयौवना ॥ शीतकाले भवेदुष्णं उष्णकाले च शीतलं ॥ ९० ॥ पिता रक्षति कौमारे भर्ता रक्षति यौ-
वने । पुत्रस्तु स्थविरे काले न स्त्री स्वातंत्र्यमर्हति ॥ ९१ ॥ चरित्रं भूषणं स्त्रीणां द्रुमाणां भूषणं फलं ॥ स्वद्युति
भूषणं पुंसां यतीनां भूषणं प्रिया ॥ ९२ ॥ नक्षत्रभूषणं चंद्रो नारीणां भूषणं पतिः ॥ पृथिवीभूषणो राजा
शीलं सर्वत्र भूषणं ॥ ९३ ॥ असंतुष्टा द्विजा नष्टा संतुष्टाश्च महीभृतः ॥ सलज्जा गणिका नष्टा
निर्लज्जाश्च कुलांगना ॥ ९४ ॥ आततायिनमायांतमपि वेदांतपारगं ॥ जिघांसंतं जिघांसीयात् न
तेन ब्रह्महा भवेत् ॥ ९५ ॥ काचः कांचनसंयोगात् धत्ते मारकतीं द्युतिं ॥ तथा सत्संनिधानेन मूर्खो या-
ति प्रवीणतां ॥ ९६ ॥ माता शत्रुः पिता वैरी बालो येन न पाठितः ॥ न शोभते सभामध्ये हंसमध्ये बको
यथा ॥ ९७ ॥ १ ॥ श्री

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अरोग्यो निर्धनो विद्वान् अरोग्यः पंडितः सुतः। अरोग्या विविधा नारी पुत्रपौत्रसमन्विता॥६८॥ रकंकार
ष्पाति अंगिनाथ वस्त्रा च बोना यत्र न विद्यते॥ नग्नस्य पणके देशे रजकः किं करिष्यति॥६९॥ भस्मना शुध्य
ते कांस्यं ताम्रमाम्लेन शुध्यति॥ रजसा शुध्यते नारी नदी वेगेन शुध्यति॥७०॥ सद्यो मांसं नवान्नं च
बाला स्त्री क्षीरभोजनं॥ घृतमुष्णोदकं चैव सद्यः प्राणहराणि षट्॥७१॥ सदा रुष्टः सदा पूज्यः सदा पूजा
मपेक्षते॥ कन्याराशौ सदा पुत्रके जामाता दशमो ग्रहः॥७२॥ वसंतामुपयोगाय दुर्जनानां विभूतयः॥
पिचुमंदफलानीह काकैरेव हि भुज्यंते॥७३॥ यौवनं धनसंपत्तिः प्रभुत्वमविवेकता॥ एकैकमप्यनर्थाय
किमु यत्र चतुष्टयं॥७४॥ स्वर्गगतानामिह जीवलोके चत्वारि येषां हृदये वदंति॥ दानं प्रसंगो मधुरा च
वाणी देवार्चनं ब्राह्मणपूजनं च॥७५॥ कार्पण्यवृत्तिः स्वजनेषु नितांतं —— कुलीनता नीचजनेषु सो

13

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चा०

॥७॥ ख्यं॥ अतीवरोषः कुटिलाच वाणी नटस्य चिन्हं नरकागतस्य॥७६॥ - - - - - - - खिसख्यमनाद्

तं कुटिल योर्धस्तनेव जनायते॥ नरिक्षवे दनुडुसरुलेनवान - - - - - - - धन्डरावोरितं॥

७७॥ इति चाणाख्यं संपूर्णं॥॥ शके १७०५ शु०। मन्मथनाम संवत्सरे माघमासि सिते पक्षे ८

तीयाशनिस्य सुतेः॥ लि खितं पुस्तं विश्वंभरया गंगाधरेण वै॥ मन्मथाब्दे सर्वधर्मे फल

दः सत्सम न्वितः॥ चाणाख्य पुस्तकं चाध्यसमाप्तं सर्वयुक्तिमत्॥२॥ ॥राम॥

॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥

१२५०

K K S U LIBRARY
RAMTEK
441 106
M-1542
Dist. Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चा०

॥७॥ खं॥ अतीवरोषः कुटिला च वाणी नटस्य चिन्हं नरकागतस्य॥ ७६॥ - - - - - - - - खिसरवामनाद

तं कुटिलयोर्धस्तनैवजनायते॥ अतिभवे दनुजुसरलेनवान - - - - - - - धनुरायोरिव

७७॥ इति चाणाक्य संपूर्णं॥ ॥ शके १७०५ ८०॥ मन्मथनाम्नि संवत्सरे ज्येष्ठमासि सिते पक्षे द्वि

तीयायां शनिसंयुतायां॥ लिखितं पुस्तं विश्रमेण योगेन धरेण वै॥ मन्मथाब्दे सर्वधर्मफल॥

दस समन्विते॥ चाणाक्यपुस्तकं चाय समाप्तं सर्वयुक्तिमत्॥ २॥ ॥ राम॥

॥ श्री॥ ॥ श्री॥ ॥ श्री॥ ॥ श्री॥ ॥ श्री॥ ॥ श्री॥ ॥ श्री॥

१२५०

KKSU LIBRARY
RAMTEK
441 106
M-1542
Dist. Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=25.08.20 14:01
,TRANSFERRED=2020/08/25 at 14:05:59
,PAGES=16
,TYPE=STD
,NAME=S0003541
,Book Name=M-1542-VRIDHCHANKYA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection